This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथअष्टोत्तरीदशाक्रमःप्रारंभः पत्र१

Acc. No:- ~~2380~~ M1032
Name:- अष्टोत्तरी दशा॥
subject:- ज्योतिष
पेज : 11

KKSU LIBRARY
RAMTEK
441 106
M1032
Dist Nagpur

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ श्रीगणेशायेनमः ॥ अथ अष्टोत्तरी दशा ॥ चत्वारि भानि पापेषु शुभे त्रीणि चयोजयेत् आर्द्रादिम
गपर्यंतं लिखेद् भिजिता सह १ षडादित्ये चवर्षाणि चंद्रे पंचदशैव तु मंगले चाष्टवर्षाणि बु
धे ससदशैव तु २ शनौ च दश वर्षाणि जीवे चैकोनविंशति राहो द्वादश वर्षाणि भार्गवे चैकविंशतिः
३ जन्मर्क्षगत नाडिघ्नं परायुः खगजैर्भजेत् लब्धं परायुषात् शोध्यं शेषमायुस्फुटं भवेत् ४ परमा
युः प्रमाणेन गुणये द्रुत नाडिकाः नक्षत्रस्य हरेद् भागं नवसा संविशोधयेत् ५ आर्द्रा चतुष्कमादित्ये
चंद्रे त्रयं मघा त्रयं भौमे हस्त चतुष्कं स्यादनुराधा त्रिकं बुधे ६ पूषा चतुष्कं मंदे तु धनिष्ठा त्रि
तयं गुरौ राहु चोत्तर चत्वारि कृत्तिकात् त्रयं भृगौ ७ दशा दशा हता कार्या भागो नंदैर्विधीयते
अंतर्दशाश्च तस्यैव प्रथमं जायते दशा ८ + नक्षत्रस्य गतानाप्तो विनिघ्नाग्न खेंदुभिः १०८
एकाशीत्या ८१ हरेद् भागं लब्धं शोध्यं परायुषात् ॥ शेषमायुः स्फुटं नणां त्रिवर्षादि स्फुटं भवेत् ॥
आबांतर्दशा ज्ञेया अनुपातान्मनीषिभिः ॥ नरायुरेकं गुणयेत् परायुर्भागमाहरेत् ॥ यल्ल
ब्धं तद् वांकं च मासादीनां प्रजायते ॥ परमायुः प्रमाणेन गुणये द्रुत नाडिकाः ॥ नक्षत्रस्य
हरेद् भागं नवसासंविशोधयेत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूर्यदशाफलं उद्विग्नचित्तः परिनष्टवित्तः शरीररोगी स्वजनैर्वियोगी
निपीडितो राजजनैः प्रवासी नरश्च दशा तां च रवेर्दशायां १ सूर्यदशाम
ध्येसूर्यांत्तर्दशामास ० सूर्यस्यां त्तर्गते सूर्ये लाभो राजकुलाद्भवेत् चित्तपीडा
व्ययोर्थानां विप्रयोगश्च बंधुभिः २ रविदशामध्ये चंद्रांतर्दशा ० मास
१० शत्रुनाशोऽर्थलाभश्च चिंतानाशः सुखागमः सूर्यस्यांतर्गते चं
द्रे व्याधिनाशश्च जायते ३ सूर्यमध्ये भौम द० मास ५ दिन १० मणिमुक्ता
कांचनं च जायते च सुखं तथा प्राप्यते भूपतेर्मानः सूर्यस्यांतर्गते कु
जे ४ सूर्यम० बुध द० मा० ११ दिन १० विलाससुखदारिद्र्यं जायते रोगसं
भवः पामाविचर्चिकादिश्च सूर्यस्यांतर्गते बुधे ५ सूर्यमध्ये शनि द०

(७)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मासद्दिन२० राजभीत्तिः शत्रुभीत्तिः कलहोदुःखमेवच जायतेधननाश
२ श्चसूर्यस्यांतर्गतेशनौ ६ सू० म० गु० द० मा० १२ दिन२० निष्पायोव्यसनेही
नोनीरोगीधनवानपिपा पापोतियद्वीगुर्वीसूर्यस्यांतर्गतेगुरौ ७ सू०
म० रा० द० मा० ९ व्यसनंवित्तनाशश्चवशं काचाथपराजितः सूर्यस्यांतर्गते
राहौघर्तोबंधुजनेः कलिः ८ सू० म० शु० द० मा० १४ ज्वरारोगशिरोरोगोना
नापीडाकलेवरे क्वापिबंधुजनैः क्लेशः सूर्यस्यांतर्गतेशिते २ अथचंद्र
दशा गजाश्वरत्नानिमहाप्रतापोमिष्टान्नपानंविविधंसुखंच अरोगी
तासर्वजनानुरागोभवेद्दशायांशशिनोनरस्य १० चंद्रदशामध्येचंद्रांत २
र्दशामास२५शोभनस्त्रीसमायोगोवस्त्राभरणसंपदः शुभकन्यासमुत्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तिश्चंद्रस्यांतर्दशागते ११ चंद्रम० भौमद० मास१३ दिन१० असत्कृशत्रुरुजापीडा
वन्हिचौरादुपद्रवाः कलहस्त्रीजनैः सार्द्धं चंद्रस्यांतर्गतेकुजे १२ चंद्रम० बुधद० मा०२२
दि०१० सर्वत्रलाभतेलाभंगजवाजिधनादिकं गोमहिष्यादिकंयश्च चंद्रस्यांतर्गते
बुधे १३ चंद्र० शनि० मास१६ दिन२० उद्वेगोवित्तनाशश्चशोकः शत्रुदयोभयं क
लहोबंधुवर्गेषु चंद्रस्यांतर्गतेशनौ १४ चं० म० राहुद० मा०२० रिपुरोगाग्निभीति
श्चबंधुनाशोधनक्षयः चंद्रस्यांतर्गतेराहोभवेदुद्वेगचिंतिताः १५ चंद्रमध्येशु०
क्रद० मा०२५ उत्तमस्त्रीजनैयोगोदिव्यकंन्यासमुद्भवः धर्मयुक्ताधनप्राप्तिचंद्रस्यां
तर्गतेसिते १६ चंद्र० रविद० मा०१० लाभोराजकुलेभ्यश्चव्याधिनाशोरिपुक्ष
यः जायतेसुखमैश्वर्यंचंद्रस्यांतर्गतेरवौ १८ इतिचंद्रदशा० अथभौमदशा०

(3)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शस्त्राभिघातो नृपतेश्च पीडा चौराग्निरोगाश्च धनैश्च(स्य) हानि कार्याभिघातश्च नरस्य
२ दैन्यं भवेद्भूम्यां चरणिसुतस्य १८ भौमदं० म० भौमतरं० मा० ७ दि० ३ घटि २० शत्रु
भिः सह संवादो बंधुभिः सह विग्रहः भौमे भौमांतरे जाते स्त्री संगो रक्तपित्तता
१९ भौमम० बु० दं० मा० १५ दिन ३ शत्रुचौरान्नृपादिभ्यो महाभीतिः प्रजायते म
हाज्वरकृतापीडा भौमस्यांतर्गते बुधे २० भौम० शु० दं० मा० ८ दि० २६ घटि ४०
धनक्षयो महादुःखं जायते च निरंतरं भौमस्यांतर्गते मंदे नरस्य विपदः सदा
२१ भौमदं० गु० मा० १६ दि० २६ धनलाभस्त्रीर्थलाभो देवब्राह्मणपूजनं भौम
स्यांतर्गते जीवे नृपात्किंचित्भयं भवेत् २२ भौ० राहो० मा० १० दि० २० शस्त्रचौरा ३
ग्निभीतिश्च रूषी स्त्री धनपीडनं भौमस्यांतर्गते राहौ यत्र तत्र भयं भवेत् २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भौम० म० शुक्रद० मा० १२ दि० २० व्याधयः शत्रुभीतिश्च धनक्षय उपद्रवः विदेशगमेगे
नंनरणां भौमस्यांतर्गते सिते २४ भौ० द० म० रवेर्द० मा० ५ दिन १० आरोग्यं सर्वतो
भद्रं राजप्रजाजयोत्सवः जायते च धनप्राप्तिर्भौमस्यांतर्गते रवौ २५ भौम० म०
चंद्रद० मा० १३ दिन १० नानावृत्तिसमुत्पन्नो मणिमुक्तासमन्वितः जायते मनुजो नित्यं
चंद्रे भौमांतरे गते २६ अथ बुधदशा नानाविधैरर्थजातैः समेतो दिव्यांगनाकेलि
युतो विलासी सर्वार्थसिद्धिं बहुमानितश्च भवेद्दशायां मनुजो बुधस्य २७ बुध म०
बुधांतर्दशा मा० ३२ दिन २ घटि २० बुद्धिकर्मानुरागश्च मित्रसंबंधिसंगमः शत्रुद्भमो
देहपीडा बुधस्यांतर्गते बुधे २८ बुध म० शनिद० मा० १८ दिन २६ घटि ४० अकस्माद्दु
र्जनैः संगोप्यकस्मादर्थसंग्रहः संपर्कोग्निगरादीनां बुधस्यांतर्गते शनौ २९ बुध०

(९)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा० गु० दृ० मा० ३५ दि० २६ घ० ४० स्वर्णादिधातुलाभश्च नारिरारोग्यमेव च संपत्ति
८ र्धर्मलाभश्च बुधस्यांतर्गते गुरौ ३० बु० रा० मा० २२ दि० २० प्रचंडसाहसिकत्वं ना
नाकार्यरणोद्यमः बुधस्यांतर्गते राहौ धनधर्मादिभोगस्तु ३१ बु० म० शु० मा०
३१ दि० २० गुरुदेवार्चने प्रीतिर्ज्ञानधर्मरतिस्तथा वस्त्रालंकारलैर्युक्तो बुधस्यां
तर्गते सिते ३२ बुधम० रवि दृ० मा० ११ दि० १० व्याधिनाशुभयैर्युक्तः पुत्रधर्मधनाग
मः जायते राजधर्मश्च बुधस्यांतर्गते रवौ ३३ बु० म० चंद्रदृ० मा० २८ दि० १० क्षय
रोगं च कुष्टं च नानापीकलेवरे बुधस्यांतर्गते सोमे मलरोगश्च जायते ३४ बु०
म० भौ मा० दृ० मा० १५ दि० ३ घ० २० नेत्ररोगी शिरोरोगी नानाक्लेशैर्निपीडीतः ४
यमभीतिश्चोरभीतिर्बुधस्यांतर्गते कुजे ३५ अथनानिदशाफलं मिथ्यापवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रोविमुखश्चबंधुर्बाधादिहानिश्चनिराशिताच कार्यसिद्धिरन्यानिधनस्यहानिः
कृशाभवंसेवशनेर्दशायां ३६ शनिद० म० शनेंतर्दशा मा० ११ दि० २० शरीरे जायते
पीडापुत्रदारैश्चविग्रहः विदेशागमनंहानिर्शनेरंतर्गतेशनौ ३७ शनिद० गु० द० मा०
२१ दि० ३ घ० २० देवलोब्राह्मणैश्चैवपुत्रमित्रधनागमः प्राप्नोतिचवरस्थानंशने
रंतर्गतेगुरौ ३८ श० रा० द० मा० १२ दि० १० ज्वरातिसारपीडाचशत्रुभीतिर्धनक्षयः
शनेरंतर्गतेराहौशस्त्रघातश्चजायते ३९ शनि० भु० मा० २७ दि० १० जायाधनसुतै
र्युक्तोजायतेचगुणान्वितः आयुरारोग्यमैश्वर्यंशनेरंतर्गतेसिते ४० शनि० मं० र
वि द० मा० ६ दि० २० पुत्रमित्रकलत्राणांहानिस्वार्थस्यजायते शनेरंतर्गतेभानौजी
वितस्यापिसंशयः ४१ श० मं० चंद्र मा० १६ दि० २० गोमहिष्यादिलाभश्चस्त्रीलाभो
विजयःसुखी जायतेकन्यकाचापिशनेरंतर्गतेविधौ ४२ श० भौ० द० मा० ८ दि० २

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ घ०४० दैवत्यागो धनत्यागो शत्रुव्याधिसमन्वितः शनेरंतर्गते भौमे जायते च महाभयं ४३
ग्र०बु०मा०१२दि०२९घटि०४० धनप्राप्तिश्च बंधेभ्यः सौभाग्यं विजयः सुखं सभायां मान्य
ताविद्याश्च नेरंतर्गते बुधे अथ गुरुदशा धर्मार्थकामैः परिपूरितश्च राजाप्रतापैर्विन
यैः समेतः धनी जयी दारसुतादियुक्तो गुरुर्दशायां च नरो नरोगी ४५ तत्र गुरुदशामध्ये
गुरो रंतर्दशा मास४०दि०३घ०२० पुत्रोत्पत्तिर्धनाप्तिश्च सर्वरत्नपरिग्रहः जायते धर्मला
भश्च गुरोरंतर्गते गुरौ ४६ गु०रा०मास२५दि०१० विस्फोटांतक मोहश्च शोकरोगो धन
क्षयः गुरोरंतर्गते राहो रिपूणां च भयं भवेत् ४७ गु०शु०मा०४४दि०१० कलहो मान
सी पीडा वित्तनाशो महाभयं जायते स्त्रीवियोगश्च गुरोरंतर्गते सिते ४८ गु०रवि२०मा०
१२दि०२० शत्रुनाशो जयो नित्यं नृपपूजा महासुखं प्रचंडैः सह संगश्च गुरोरंतर्गते रवौ
४९ गु०चं०मा०३१दि०२० बहुस्त्रीसंगमश्शीलः शत्रुपीडाविवर्जितः गुरोरंतर्गते चंद्रे कं ५
न्या जन्म च जायते ५० गु०भौ०मा०१६दि०२६घ०४० रिपुनाशो धनप्राप्तिः सर्वकार्यसमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गमः सुखसौभाग्यमारोग्यं गुरोरंतर्गते कुजे ५१ गु०बु०मा०३५दि०२६घ००बुद्धि

विज्ञानकौशल्यं धनबंधुसमागमः गुरुदेवाग्निभक्तिश्च गुरोरंतर्गते बुधे ५२ गु०श०

मा०२१दि०२घ०२० स्त्रीघृतमद्यपेश्चैव चनधान्यस्यसंक्षयः जायते कुष्ठ लुप्तधर्मश्च गु

रोरंतर्गते शनौ ५३ अथ राहुदशा स्थानस्यहानिर्गमनं विदेशे धर्मस्यहानिर्विविधाश्च

रोगाः सर्वत्रशून्यं तनुसंशयश्च राहोर्दशायां नियतं जनस्य ५४ राहुदशम०राहुरंतर्दशा मा०

१६दिन द्विजेंद्रैः सह संसर्गः स्त्रीलाभो धनसंचयः राहोरंतर्गते राहौ कलहो बंधुभिः स

ह ५५ रा०शु०मा०२८दि० धर्मिष्ठः ससवारीच धनरोगविवर्जितः जायते राजमा

न्यश्च राहोरंतर्गते सिते ५६ राहु०रवि०मा०८ पुत्रदुःखं महाभीतिर्धननाशो विचिंतता

श्चाग्निचोरभयं क्वापि राहोरंतर्गते रवौ ५७ रा०चं०मा०२०दि०० स्त्रीयशो धननाशश्च क

लहो बांधवैः सह राहोरंतर्गते चंद्रे जायते च महद्भयं ५८ रा०भौ०मा०१०दि०२० सुहृ

द्बंधुजनैर्योगो धनधान्यसुखागमः न कश्चिज्जायते क्लेशो राहोरंतर्गते कुजे ५९

(6)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ रा० बु० मा० २२ दि० २० सुहृद्बंधुजनैर्योगो धनधान्यसुखागमः नकीर्त्तिर्जायते न्नूनो
राहोरंतर्गते बुधे ६० रा० हु० श० मा० १२ दि० १० स्वदेशस्य परित्यागः कुंकुटुंबसहसंगमः
भस्यार्थयोस्तथा नाशो राहोरंतर्गते शनौ ६१ रा० हु० गुरु० मा० २८ दि० १० रोगहानिर्दुः
खहानिर्देवब्राह्मणपूजनं धनधान्यसमृद्धिश्च राहोरंतर्गते गुरौ ६२ अथ शुक्रमा
हादशा नृपेणमान्यो धनधान्यपूर्णो हस्त्यश्वयुक्तः प्रमदानुरक्तः मंत्रप्रयोगे निपुण
श्च नूनं स्वकवेदंशायां कुशली मनुष्यः ६३ शुक्रदशामध्ये शुक्रस्यांतर्दशा मा० ४८ दिन०
मानवृद्धिः सुतोत्पत्तिर्धनधान्यागमः सुखं स्वर्णवस्त्रादिलाभश्च त्रिशत्स्यांतर्गते सिते ६४
शु० रवि० मा० १४ दि० ० शत्रुनाशो जयो नित्यं नृपलौंभो महासुखं प्रचंडैः सह संसर्गः शुक्रस्यांत
र्गते रवौ ६५ शु० च० मा० ३५ दिन० गुरुदेवाग्निभक्तिश्च दुःखमल्पं सुखं तथा शुक्रस्यांतर्ग
ते चंद्रे शत्रुमित्रसमागमः ६६ शु० भौ० मा० १८ दि० २० संग्रामे च रिपून्जित्वा धनकीर्त्तिं च ल ६
भ्यते आरोग्यं सुखमैश्वर्यं शुक्रस्यांतर्गते कुजे ६७ शु० बु० मा० ३९ दि० २० नरवेरु जारि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोरोगेदुःखनानांसमुद्भवं शरीरेजायतेपीडाशुक्रस्यांतर्गतेबुधे ६८ शुं०शने०मा०२३
दि०१०वृद्धिस्त्रीभिश्चसंसर्गःसुखंचार्थागमस्तथा शत्रुनाशःसुहृल्लाभःशुक्रस्यांत
र्गतेशनौ ६९ शुं०गु०मास२४दि०१०धनधान्यसमृद्धिश्चनानाधर्मसुतान्वितः श्रेणी
प्रमुखमाप्नोतिशुक्रस्यांतर्गतेगुरौ ७० शुं०राहु०मा०२८दि०वैरंविषादोदुःखंचसद्रो
द्वेगोमहाभयं शुक्रस्यांतर्गतेराहौकदाचित्सुखमाप्नुयात् ७१ इत्यष्टोत्तरिदशाफलं॥
अथविंशोत्तरिदशाफलं षडादित्येदशौचसप्तवर्षाणिमंगले अष्टादशतथाराहौषो
डशौचबृहस्पतौ ७२ एकोनविंशतिर्मंदेबुधेसप्तदशैवच सप्तवर्षाणिकेतौचविंश
तिर्भार्गवेतथा ७३ कृत्तिकामघमूलाभरण्यांचाधिगण्यते रवि६चंद्र१०भौम७रा
हु१८गुरु१६शनि१९बुध१७केतु७शुक्र२० अथकेतुदशाफलम् लक्ष्मीविनाशोवनितार्थहा
निःशरीरपीडाऽपमानभंगः प्रियैःकुटुंबैश्चभवेद्वियोगोकेतुर्दशायांसततंचतापः ७४
केतुर्माहादशामध्येकेतुरंतर्दशा शत्रुनाशोर्थनाशश्चदुष्टनारीजनैःकलिः केतुरं

८ तर्गते केतौ राजभिः शत्रुविग्रहः ७५ केतु॰शु॰ स्त्रीसंयोगो वह्निदाहश्च कन्याजन्म
तथा ज्वरः केतोरंतर्गते शुक्रे मित्रैः सह कलिर्भवेत् ७६ केतु॰सू॰ अग्निदाहो ज्व
रो घोरो विदेशगमनं सदा केतोरंतर्गते सूर्ये क्षयरोगश्च जायते ७७ केतु॰चं॰ अर्थ
लाभोऽप्यर्थहानिश्च सुखदुःखं क्वचित्क्वचित् केतोरंतर्गते चंद्रे स्त्रीलाभश्चापि जाय
ते ७८ केतु॰भौम॰ गोत्रजैः सह संवादो वह्निचौरभयं तथा शरीरे जायते पीडा के
तोरंतर्गते कुजे ७९ केतु॰रा॰ केतोरंतर्गते राहौ कलहः शत्रुभिः सह चौरभीतिर्देहभं
गः कुमित्रैः सह संगतिः ८० केतु॰गु॰ राजमान्यजनैर्योगः द्विजेंद्रैश्च सुखागमः भूमि
लाभः पुत्रलाभो केतोरंतर्गते गुरौ ८१ केतु॰शनि॰ वातपित्तकृता पीडा स्वजनैः सह वि
ग्रहः विदेशगमनं चापि केतोरंतर्गते शनौ ८२ केतु॰बुध॰ सुहृद्बंधुसमायोगो भूरि
वित्तं च विग्रहः देहपीडा भवेन्नित्यं केतोरंतर्गते बुधे ८३ इति केतुदशाफलं ॥
अन्यग्रहमध्ये केतुफलं देशत्यागो बंधुनाशो धननाशः सुतक्षयः सूर्यस्यांतर्गते ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेकेतौसर्वत्रैवाशुभंभवेत् ८४ चलचित्तार्थनाशश्चरोगोवंधुजनक्षयः चंद्र
स्यांतर्गतेकेतौदुःखमेवहिजायते ८५ विषशस्त्राग्निचौरेभ्योजायतेचमहद्भयं
भौमस्यांतर्गतेकेतौदुःखमेवहिजायते ८६ ज्वराग्निरिपुशस्त्रेभ्योमसुरायातिस
र्वदा राहुरंतर्गतेकेतौशुभंक्वापिनलभ्यते ८७ पुत्रबंधुकृतोद्वेगोनिजस्थानवि
वर्जितः गुरोरंतर्गतेकेतौपरिभ्रमतिमानवः ८८ रक्तपितकृतापीडाकलहःस्व
जनैःसह शनेरंतर्गतेकेतौघोरदुःखप्रदर्शनं ८९ शोकदुःखाकुलोनित्यंशरीरे
क्लेशसंयुतः बुधस्यांतर्गतेकेतौभवेसेवनसंशयः ९० इतिग्रहमध्येकेतुफलं
अथजन्मदशाफलं जन्मलग्नसमारभ्यगतवर्षाणिवर्जयेत् द्वादशेषुचभागेषुग्रहै
र्वाच्यंशुभाशुभम् ९१ इतिवर्षदशाफलं विंशतिर्वासराःसूर्येपंचाशच्चनिशा
करे सप्तविंशतिरंगारेसप्तपंचाशदिंदुजे ९२ त्रयस्त्रिंशच्चमंदेचत्रिषष्ठी

(९)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

श्चबृहस्पतौ विंशतिः सिंहिकेयेचकेतावपिचविंशति २३ सप्ततिर्भृगुपुत्रेतु

ज्ञेयामासदशाबुधे नामराशिंसमारभ्यसंक्रमावधिगण्यते २४ इतिमासदशा

तिथिवारंचनक्षत्रंनामाक्षरसमन्वितं नवभिश्चहरेद्भागंशेषंदिनदशोच्यते

२५ रवि० चंद्र० भौम० राहु० जीव० शनि० बुध० केतु० शुक्र० चैत्रादौद्विगुणामा

सागताभिस्तिथिभिर्युताः सप्तभिश्चहरेद्भागंशेषंदिनफलंस्मृतं २६ संपति

कलहोलोकेरानंदःकालकंटकं धर्मस्तपश्चविज्ञेयोरविवारक्रमात्फलं २७

क्रूरग्रहदशायांचेत्क्रूरस्यांतर्दशायदा म्रियतेचचिरंजीवीकाकथास्वल्पजीवि

नां २८ क्रूरराशौस्थितःपापःषष्ठेवानिधनेपिवा शितेनरविनादृष्टःस्वपाकेम ८

सुदायहाः २९ लग्नस्याधिपतिःशत्रुर्लग्नस्यांतर्दशायदा करोत्यकस्मान्मरणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्याचारेणभाषितं १०० अथदशारिष्टः प्रवेशोबलवान्रवेः शुभैर्वासन्निरी
क्षितः सौम्याधिमित्रवर्गस्थेरिष्टभंगोभवेत्तदा १०१ मूलदशाधिनाथस्यवा
चस्पतिर्दशायदी बलीशुभोथविज्ञेयोरिष्टभंगस्तदाबुधैः १०२ शुभग्रहोग्रहै
र्योगेविजयीयदिजायते दशायांनभवेत्कष्टंस्वोच्चादिषुचसंस्थितः १०३ इतिद
शारिष्टभंगः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१

इतिअष्टोत्तरीदशासमाप्तः

१

KKSU LIBRARY
RAMTEK
441 106
M1032
Dist Nagpur

(11)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=06.10.20 10:57
,TRANSFERRED=2020/10/06 at 11:00:14
,PAGES=18
,TYPE=STD
,NAME=S0003897
,Book Name=M-1032-ALTOTARI DASHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE18=00000018.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection